 **0930** Seat No. | | | | | |

**Time : 1½ Hours** **SANSKRIT COMPOSITE (S.L.)**

**Subject Code**

| S | 1 | 6 | 3 |
|---|---|---|---|

**Total No. of Questions : 5** **(Printed Pages : 8)** **Maximum Marks : 40**

***INSTRUCTIONS :***

(*i*) सर्वेषां प्रश्ननानाम् उत्तराणि नवीनपृष्ठे लेखनीयानि।

(*ii*) प्रश्ननानाम् क्रमाङ्काः, उपप्रश्ननानाम् अक्षराणि स्पष्टतया लेखनीयानि।

(*iii*) सर्वे प्रश्नाः अनिवार्याः सन्ति।

(*iv*) सम्पूर्णे उत्तरपत्रे एकस्याः एव स्वभाषायाः उपयोगः करणीयः।

(*v*) दक्षिणभागे दार्शिताङ्काः गुणाङ्काः सन्ति।

(स्वभाषा नाम—हिंदी, मराठी, कोंकणी आङ्गलभाषा च।)

**प्रथमखंडः (पठितावबोधनम्)**

1. (क) अधस्तनं गद्यखण्डं पठित्वा प्रदत्तान् प्रश्नान् सूचनानुसारेण संस्कृतभाषया उत्तरत। 3

पर्वतशिखरस्य अधः नातिदूरे 'थळ' इति स्थानमस्ति, यत्र पूर्वम् अनेके प्रसिद्धाः सङ्गीतोपासकाः अखण्डतया सङ्गीतसाधनया शिवाराधनां कुर्वन्ति स्म। शिखरप्रदेशे बृहत्कृष्णशिलामध्ये 'चन्द्रेश्वर' नाम्ना प्रसिद्धं शिवलिङ्गः विलसति। चन्द्रेश्वरस्य दक्षिणे कोणे भूतनाथशिला अस्ति। तस्याः अग्रभागे एकं लघुवातायनमस्ति।

**प्रश्नाः** —

**एक**वाक्येन उत्तरत।

(1) भूतनाथशिला कुत्र अस्ति ?

(2) शिखरप्रदेशे किं विलसति ?

(3) सङ्गीतोपासकाः कया शिवाराधनां कुर्वन्ति स्म ?

(ख) अधस्तनं पद्यखण्डं पठित्वा प्रश्नान् संस्कृतभाषया उत्तरत। 2

शतेषु जायते शूरः सहस्रेषु च पण्डितः।

वक्ता दशसहस्रेषु दाता भवति वा न वा॥

वाचनं ज्ञानदं बाल्ये तारुण्ये शीलरक्षकम्।

वार्धके दुःखहरणं हितं सद्ग्रन्थवाचनम्॥

**एक**वाक्येन उत्तरत।

(1) कः शतेषु जायते ?

(2) कदाः वाचनं ज्ञानदं भवति ?

(ग) **एकस्य** गद्यखण्डस्य स्वभाषया अनुवादं लिखत। 2

(अ) इत्थं सेवानिरतस्य तस्य एकः मासः व्यतीतः। अस्मिन्नन्तरे तस्य भार्या मालती पितृगृहात् प्रत्यावर्तत। माधवः तां तत् सर्वं विस्तरेण अकथयत्। तौ सत्वरं कुम्भकारस्य गृहात् दशघटान् अक्रीणाताम् तदैव प्रतिवेशी दुग्धाय तम् आह्वयत्।

(आ) देवेशः – अस्मिन् ध्वजे त्रयः वर्णाः सन्ति, अतः त्रिवर्णः। किं त्वम् एतेषां वर्णानां नामानि जानासि ?

सलीमः – अरे! केशरवर्णः, श्वेतः हरितः च एते त्रयः वर्णाः।

देवेशः – अस्माकं ध्वजे एते त्रयः एव वर्णाः कथं गृहीताः ?

सलीमः – एतेषां त्रयाणां वर्णानाम् अत्र विशेषः अभिप्रायः।

(घ) वाक्यांशयोः मेलनं कुरुत। 1

(1) सिकताव्यवसायः – सृष्टिसौन्दर्यं द्रष्टुम् आगच्छन्ति

(2) पर्यटकाः – अधः वहामि।

– तटयोः चलति।

2. (ङ) **एकस्य** पद्यखण्डस्य अनुवादं स्वभाषया लिखत। 2

(अ) कुसुमं वर्णसम्पन्नं गन्धहीनं न शोभते।

न शोभते क्रियाहीनं मधुर वचनं तथा॥

(आ) मनुजा वाचनेनैव बोधन्ते विषयान् बहून्।

दक्षा भवन्ति कार्येषु वाचनेन बहुश्रुताः॥

(च) **एकस्य** प्रश्नस्य उत्तरं स्वभाषया लिखत। 2

(अ) गोमन्तके भाऊसाहेबस्य जन्मदिनं 'छात्रदिनम्' इति रूपेण किमर्थं सम्पद्यते ?

(आ) माण्डव्याः उद्गमतः समुद्रपर्यन्तं प्रवासवर्णनं लिखत।

(छ) पूर्णवाक्येन संस्कृतभाषया उत्तरं लिखत। 2

(अ) माधवेन स्ववर्तमानं कथं विनाशितम् ?

(आ) भाऊसाहेबस्य स्मारकं कुत्र शोभते ?

(ज) सुभाषितं शुद्धं पूर्णं च लिखत। 2

यस्य नास्ति ...................................... ॥

**द्वितीयखंडः (अपठितावबोधनम्)**

3. (झ) अधः दत्तं गद्यखण्डं पठित्वा प्रश्नानाम् उत्तराणि लिखत। 3

निसर्गस्य अनेके परोपकारिणः घटकाः भवन्ति। तेषु वृक्षाणाम् अनन्यसाधारणं महत्त्वम् अस्ति। वृक्षाः नाम साक्षात् मानवानां पशुपक्षिणां च मित्राणि। ते स्वयम् आतपे स्थित्वा परेभ्यः छायां फलानि मूलानि च यच्छन्ति। किन्तु स्वार्थपराः जनाः तान् कर्तयन्ति। तेन पर्यावरणस्य आर्द्रता विनश्यति। तेन वृष्टिः न भवति। कृषकाः यथोचितं धान्यं न लभन्ते। अतः पादपानां संरक्षणं संवर्धनं च अतीव महत्त्वपूर्णम् अस्ति।

**एक**वाक्येन संस्कृतभाषया उत्तरत।

(1) वृक्षा केषां मित्राणि सन्ति ?

(2) वृक्षा परेभ्यः किं यच्छन्ति ?

(3) वृक्षकर्तनेन का विनश्यति ?

(ञ) **एकं** परिच्छेदं स्वभाषया अनुवदत। 3

(अ) एकस्मिन् वने शृगालः बकः च निवसतः स्म। तयोः मित्रता आसीत्। एकदा प्रातः शृगालः बकम् अवदत् – "मित्र, श्वः त्वं मया सह भोजनं कुरु"। शृगालस्य निमन्त्रणेन बकः प्रसन्नः अभवत्। अग्रिम दिने सः भोजनाय शृगालस्य गृहम् अगच्छत्।

(आ) एकः शिरस्त्रविक्रेता आसीत्। तस्य नाम रमेशः। सः प्रतिदिनं ग्रामं गच्छति। शिरस्त्राणि विक्रीणीते एकदा रमेशः मार्गे श्रान्तः भवति। एकस्य वृक्षस्य अधः शिरस्त्रस्यूतं स्थापयति। निद्रां करोति। वृक्षस्य उपरि वानराः भवन्ति। ते रमेशस्य स्यूते शिरस्त्राणि पश्यन्ति।

## तृतीयखंडः (व्याकरणम्)

4. (ट) रिक्तस्थानेषु उचितानि पदानि कोष्ठकात् चित्वा लिखत। 2

(अ) ............................ गृहे एकः यज्ञः सम्पत्स्यते। (श्रेष्ठिनः, श्रेष्ठिने)

(आ) अहं सागरे एकरूपतां ............................। (याति, यामि)

(ठ) सूचनानुसारं **द्वयोः** वाक्ययोः परिवर्तनं कृत्वा लिखत। 2

(अ) अहं पयः दास्यामि। [लट्लकारे (वर्तमानकाले) परिवर्तयत]

(आ) अस्मिन् चित्रे (5) वर्णाः सन्ति। (संख्यावाचि पदं लिखत)

(इ) चन्द्रेश्वरस्य परितः मूर्तयः सन्ति। (वाक्यं संशोध्य लिखत)

(ई) बालकः जलं पिबति। (वाक्यं बहुवचने परिवर्तयत)

(ड) रेखाङ्कितपदम् आधृत्य प्रश्ननिर्माणं कुरुत। 2

(अ) <u>पर्वतस्य</u> मूलभागे 'मुळस' इति स्थानमस्ति।

(आ) सा <u>माधवहस्ते</u> पात्रम् अपश्यत्।

(ढ) तालिकायां रिक्तस्थानेषु समस्तपदम् विग्रहवाक्यं समासनाम वा लिखत। 2

| | **समस्तपदम्** | **विग्रहः** | **समासनाम** |
|---|---|---|---|
| (अ) | अयोग्यम् | ........................... | नञ् तत्पुरुषः |
| (आ) | पर्वतशिखरम् | पर्वतस्य शिखरम् | ........................... |

(ण) विलोमपदानि लिखत। (**एकम्**) 1

(अ) शीतम्

(आ) प्राचीनः।

(त) पर्यायपदानि लिखत। (**एकम्**) 1

(अ) पाणिः

(आ) पुष्पम्।

## चतुर्थखंडः (रचना)

5. (थ) कोष्ठकात् उचितपदानि चित्वा **द्वे** सार्थकवाक्ये लिखत। 2

| | | | |
|---|---|---|---|
| (अ) | छात्राः | वृक्षे | तरति। |
| (आ) | फलानि | जले | पठन्ति। |
| (इ) | मीनः | विद्यालये | सन्ति। |

(द) अधोलिखितानि वाक्यानि घटनाक्रमानुसारं लिखत। 4

(1) सः मार्गे एकम् अस्थि प्राप्नोति।

(2) यदा शुनकः सेतोः उपरि आगच्छति तदा जले स्वप्रतिबिम्बं पश्यति।

(3) एकदा शुनकः भ्रमणार्थं गच्छति।

(4) यदा शुनकः मुखम् उद्घाट्य भषति तदा अस्थि जले पतति।

(5) प्रतिबिम्बं दृष्ट्वा गुर् गुर् करोति।

(6) अस्थि मुखे धृत्वा गृहम् आगच्छति।

(7) मार्गे एकः सेतुः भवति।

(8) प्रतिध्वनिः आगच्छति।

(ध) चित्रम् आधृत्य **चत्वारि** वाक्यानि लिखत। 2

(कृषकः – मन्दिरम् – क्रीडाङ्गणम् – ध्वजः – बालकाः)

